# SAMPLE QUESTION PAPER

## SANSKRIT
## Part II Language

1) Design
2) Blue Print
3) Question Text
4) Answer Key
5) Questionwise Analysis

www.StudyGuideIndia.com

# मानसिकव्यापारः

**( Mental Process )**

1. परिचितविषयमनुस्मरति।
2. साजात्यवैजात्यान् विवेचयति।
3. कार्यकारणबन्धमवगच्छति।
4. आशयान् वर्गीकरोति।
5. आशयान् धारणाश्च रूपवत्करोति।
6. स्वमतानुसारं व्याख्याते।
7. आशयान् अवगतविषयांश्च नूतनसन्दर्भे प्रयुङ्क्ते।
8. अवगतानाशयान् विविध व्यवहाररूपेण प्रकटयति।
9. ऊहं करोति भावयति च।
10. सृजनात्मकतया चिन्तयति।
11. विमर्शनबुद्ध्या चिन्तयति।
12. सयुक्तिकं चिन्तयति।
13. मूल्यनिर्णयं करोति।

www.StudyGuideIndia.com

## पाठ्यांशानां पाठ्यचर्योद्देश्यानां वा आपेक्षिकं प्राधान्यम्।

## Weightage to Cluster of COS/content area (unit)

| Sl. No. | Cluster of COS/content area | No. of Qns. | Score | % |
|---|---|---|---|---|
| 1 | काव्यम् (श्रीकृष्णविलासम्) | 10 | 33 | 41.25 |
| 2 | नाटकम् (दूतवाक्यम्) (सुदर्शनप्रवेशमपहाय) | 9 | 33 | 41.25 |
| 3 | भाषानुवादः | 2 | 8 | 10 |
| 4 | लेखः | 1 | 6 | 7.5 |
| | Total | 22 | 80 | 100 |

## प्रश्नस्वरुपाणामापेक्षिकप्राधान्यम्

## WEIGHTAGE TO TYPE OF QUESTIONS

| क्रमसंख्या Sl. No. | प्रश्नरूपाणि Type of Questions | प्रश्नसंख्या No of Qn. | अङ्काः Score | प्रतिशतम् % |
|---|---|---|---|---|
| 1 | वस्तुनिष्ठम् (OBJECTIVE TYPE) | 8 | 14 | 17.5 |
| 2 | ह्रस्वोत्तरम् (SHORT ANSWER TYPE) | 10 | 36 | 45 |
| 3 | उपन्यासः (ESSAY) | 4 | 30 | 37.5 |
| 4 | अन्यानि (OTHERS) | - | - | - |
| | आहत्य Total | 22 | 80 | 100 |

www.StudyGuideIndia.com

# परिनिष्ठापत्रम्
## Blue Print

| क्रमसंख्या | पाठ्यांशः/पा.उ.श्रेणी content/cluster of COs | वस्तुनिष्ठम् Objective type | ह्रस्वोत्तरम् S.A.Type | उपन्यासः Essay | आहत्य Total |
|---|---|---|---|---|---|
| 1 | काव्यम् (श्रीकृष्णविलासम्) | 9 (3) | 16 (6) | (1) 8 | 33 (10) |
| 2 | नाटकम् (दूतवाक्यम्) | 5 (5) | 12 (2) | 16 (2) | 33 (9) |
| 3 | भाषान्तरीकरणम् | - | 8 (2) | - | 8 (2) |
| 4 | लेखः | - | - | 6 (1) | 6 (1) |
| | आहत्य अङ्काः | 14 | 36 | 30 | 80 |
| | आहत्य प्रश्नाः | 8 | 10 | 4 | 22 |

www.StudyGuideIndia.com

# HIGHER SECONDARY COURSE
# SAMPLE QUESTION PAPER
# SANSKRIT
**(Part - II - Language)**

**Std-XII** **Score - 80**
**Time : 2.30 hrs**

(निर्देशाः- 1. सर्वे प्रश्नाः समाधेयाः।

2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरत।)

I अधः प्रदत्तं श्लोकं सम्यक् पठत। निर्देशानुसारं उत्तरत।

(Read the poem carefully and answer as per direction given below) (Score-5)

सर्वे वयं दैत्यकुलप्रसूताः
केनापि जाता भुवि कारणेन।
स तेन सन्नह्यति जेतुमस्मान्
उक्तोऽयमर्थः किल नारदेन।।

क. श्लोकेऽस्मिन् अधोरेखाङ्गितं पदं विश्लेषयत।
(Split up the word underlined)
यथा - सः + अयम् = सोऽयम्।

ख. श्लोकेऽस्मिन् प्रयुक्तं तुमुन्नन्तपदं किम्?
(Which word of the poem ending with suffix तुमुन्)
(जाताः, जेतुम्, तेन)

ग. असुरवंशे जाताः इत्यर्थे प्रयुक्तं पदं किम्?
(Which word of the poem means 'born in Asura dynasty')

घ. श्लोकस्याशयं स्ववाक्यैः लिखत।
Write the meaning of the sloka in your own words

2. नन्दः ब्राह्मणैः दुरितापहरिणीः क्रियाः अकारयत् तत्र कारणं किम्?

(For what purpose Nandagopa make to do rituals by Brahmana) (Score - 1)

(मनः अच्युतस्मरणे असमर्थः इत्यतः, पुत्रम् असुरात्। रक्षितुम्, पुत्रस्य अभ्युन्नतिं इय्छत्)

3. अधः प्रदत्तं श्लोकं सम्यक् पठत। ततः यथानिर्दिष्टं लघूपन्यासम् आरचयत?

(Read the peom carefully and write a short essay as directed below) (Score - 8)

शठः बान्धवनिः स्नेह! काक! केकर! पिङ्गल।
त्वदर्थात् कुरुवंशोऽयमचिरान्नाशमेष्यति।।

www.StudyGuideIndia.com

अत्र दुर्योधनस्य स्वभावे शठत्व, दर्पत्व, कुलनाशकत्वादिदोषाः कृष्णेन सुचिताः। एते दोषाः वस्तुतः युज्यते वा? दूतवाक्यानुसारेण दुर्योधनस्य स्वभावं निरूपयत?

(Write the characteristics of Duryodhana as per Dootavakya)

**सूचनाः -**

पाण्डवानां विषये धर्मात्मजादिपरामर्शः - ते परात्मजा : इति द्रढीकरणं - राजलाभार्थं युद्धं कर्तव्यमिति परिहासः - कृष्णं प्रति अपि उपक्षेपः - पाण्डवैः सह बन्धुता नास्ति इति परामर्शः - स्वराज्ये न दास्यति इति दर्पः च।

4. अधोलिखितं श्लोकं सम्यक् पठित्वा सूचनानुसारं आस्वादनटीकां रचयत।

(Read the following poem carefully and write an appreciation note)

पाञ्चजन्यमिवपूतनास्तनम्
पाणिपल्लवयुगेन पीडयन्।
आननेन मधुशत्रुरान्तरा-
नाददे न तु ततस्समीरणान्।। (Score - 4)

**सूचनाः-**

श्लोकस्याशयः, सूचिता कथा, औचित्यम्, पदप्रयोगचातुर्यम्।

5-9. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत।

(Write the correct answer choosing from bracket) (Score - 5)

5. राहुवक्त्रान्तरगता चन्द्रलेखा इव का?

(यशोदा, द्रौपदी, कुन्ती)

6. भासनाटकचक्रे कति रूपकाणि सन्ति?

(एकादश, द्वादश, त्रयोदश)

7. 'अवद्यां प्रमदां हत्वा'। अत्र सूचिता प्रमदा का?

(Who is mentioned by the word प्रमदा)

(यशोदा, पूतना, देवकी)

8. सागरान्तां गां हरिष्यन्ति हि पाण्डवाः। अत्र गोशब्दस्य कोऽर्थः?

(Which is the meaning of the गोशब्द in this context?)

(धेनुम्, धनम्, भूमिम्)

9. देवात्मजैर्मनुष्याणां कथं वा बन्धुता भवेत्। अत्र देवात्मजाः इत्यनेन के परामृष्टाः?

(Who were mentioned by the word देवात्मजाः)

(पाण्डवाः, कौरवाः, यादवाः)

www.StudyGuideIndia.com

10. अधः प्रदत्तं श्लोकांशं सम्यक् पठत। अत्र अधोरेखाङ्गितस्य पादस्य समानाशयरूपं वाक्यं प्रदत्तेभ्यः चित्वा लिखत?

(Read the part of Sloka carefully and findout the meaning of udnerlined pada from the set of meanings given below) (Score - 2)

सुरेषु सर्वेष्वपि दुर्बलेषु
हस्ते भविष्यत्मरावती नः।

कः - यदा सुराः दुर्बलाः तदा।
खः - सुराः सर्वे दुर्बलाः सन्ति।
गः - सुरेषु दौर्बल्यमस्ति।

11. युष्माकं विद्यालयस्य वार्षिकसमारोपः एप्रिलमासे भविष्यति इति संभावयत तदानीं के के भविष्यन्ति इति सविस्तरं प्रतिपाद्य कार्यक्रमेऽस्मिन् भागं ग्रहीतुं सुहृदं आमन्त्रय लेखमेकं लिखत?

(Suppose your school Anniversary is being conducted in the month of April. Describe the programme to be conducted on that occassion in detail and write a letter to your friend inviting for the programme) (Score - 6)

www.StudyGuideIndia.com

12. अधः प्रदत्तमाशयं सम्यक् पठत। तदाशयप्रतिपादकं श्लोकं प्रदत्ताभ्यां चित्वा लिखत।

(Read the passage carefully and choose the Sloka of the same meaning) (Score - 2)

मधुसूदनः कराभ्यां चरणाङ्गुष्ठं पातुम् इच्छन् तत् वदनमुपानयत्। तदा स्वर्गङ्गा नखशोभाव्याजेन निपातिता इव विराजत।

**श्लोकाः -**

- मुग्धभावमधुरेणरञ्जयन्
  शैशवेन हृदयं व्रजौकसाम्।
  गोकुले स विजहार केशवः
  क्षीरवारिनिधिमप्यचिन्तयन्।।
- वदनं मधुसूदनः कराभ्याम्
  चरणाङ्गुष्ठमुपानयत् पिपासुः।
  गलितेव ततस्सुरस्रवन्ती
  नखमुक्तामणिदीधितिच्छलेन।।

13. अधः प्रदत्तेषु चतुरः नाटकसङ्केतान् अधिकृत्य लघुटिप्पणीः लिखत।

(Write short notes on any four of the following technics of Drama) (Score - 8)

1. सूत्रधारः 2. नान्दी 3. स्वगतम् 4. प्रकाशः
5. प्रस्तावना 6. भरतवाक्यम्

14. अधोलिखितं गद्यभागं सम्यक् पठत। तदाशयं प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत?
(Read the passage and translate its meaning into the regional language or in English)
(Score - 5)

अद्वैतदर्शनस्य उपज्ञाता भवति श्रीशङ्कराचार्यः। सः केरलेषु कालटिग्रामे लब्धजन्मा अभूत्। आसेतुहिमाचलं पर्यटन् सः सकलान् शास्त्रान् अधीतवान्। ततः अद्वैतवेदान्तदर्शनं युक्तिभिः प्रमाणैच व्यवस्थापितवान्। सः काश्मीरेषु सर्वज्ञपीठम् आरुरोह।

15. अधोलिखितेषु श्लोकेषु युष्माकम् इष्टतमः श्लोकः कः इति सयुक्तिकं प्रतिपादयत।
(Which sloka of the following is very much appreciated by you Describe)(Score - 4)

- स्रुतशोणितमेव मन्यमाना
  चरणं तस्य निसर्गपाटलं तत्।
  उदमार्जयदंशुकाञ्चलेन
  द्रुतमागत्य पुनः पुनर्यशोदा।।

- शकटं मधुसूदनस्य दृष्ट्वा
  चरणोदञ्चनविभ्रमेण भग्नम्।
  अथ वारिनिधेर्विवेश गर्भम्
  स्वरथस्यापि विशङ्क्य भङ्गमर्कः।।

- परितः स्फुरता नवेन सन्ध्या
  महसा पल्लवपाटलेन लिप्ताः।
  पतिता इव पावके विरेजुः
  ककुभो दुस्सहभानुविप्रयोगात्।।

16. विना गोरसं कोरसं भोजनानाम्। अस्मिन् श्लोकांशे अव्ययपदं किम्?
(Which word of the above pada is अव्यय) (Score - 1)

17. राजसभायां दुर्योधनस्य चित्रपटवर्णनया भासः अस्माकं मनसि चित्रं प्रतिबिम्बितवान्। दूतवाक्यस्य प्रकटणानुसारं वाक्यमिदं विमर्श्य स्ववाक्यैः उपन्यस्यत?
(The picture shown by Duryodhana in his राजसभा is reflect in our mind in the words of Bhasa. Critically examine the sentence as per Dutavakya and write an essay by your own words.) (Score - 8)

**सूचनाः-**

दुश्शासनपरामृष्टा द्रौपदि...... युधिष्ठिरः भीमं निवारयति...... अर्जुनः गाण्डीवज्यां समाकर्षति ......... नकुलसहदेवौ दुश्शासनम् आक्रामतः ............ युधिष्ठिरः तौ निवारयति ......... गान्धारराजः अक्षक्रीडामध्ये द्रौपदीं काक्षेण पश्यति।



www.StudyGuideIndia.com

18. अधोलिखितानि वाक्यानि संस्कृतभाषया अनुवदत ?
(Translate the following sentence into Sanskrit) (Score - 3)

क. കുട്ടികൾ ഉദ്യാനത്തിൽ കളിക്കുന്നു. (Children are playing in the garden)

ख. നദികൾ കേരളത്തിന്റെ സമ്പത്താണ്. (Rivers are the wealth of Kerala)

ग. ദൃശ്യം ശ്രവ്യം എന്നിങ്ങനെ കാവ്യം രണ്ടുവിധത്തിലുണ്ട്. (Kavyas are of two types -**दृश्य** and **श्रव्य**)

19. अधोलिखितं श्लोकं सम्क् पठित्था अधः प्रदत्तानां प्रश्नानामुत्तराणि लिखत ?
(Read the sloka carefully and write answers to questions noted below:) (Score - 4)

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय।।

क. खलस्य विद्या किमर्थम् ?

ख. साधोः विद्या किमर्थम् ?

ग. खलस्य धनं किमर्थम् ?

घ. साधोः धनं किमर्थम् ?

20. अधः प्रदत्तं श्लोकं पठित्वा सूचनानुसारं गद्यक्रमं लिखत ? (Read the poem carefully and write prose order as per hints) (Score - 2)

प्रतिवेदि निविष्टपूर्णकुम्भम्
विलसत्तोरणमुज्वलत्प्रदीपम्।
व्रज गोकुलमाकुलं प्रजाभिः
भवदीयागमनप्रहर्षणीभिः।।

**गद्यक्रमम्** - (त्वं) ........ विलसत्तोरणम् ........ भवदीयागमनप्रहर्षणीभिः ............ आकुलं ............ व्रज।

21. गोकुले श्रीकृष्णस्य लीलाविलासः कस्यचन शिशोः चापल्यादारभ्य प्रौढस्य कस्यचन धीरतापर्यन्तम् परिमितैः श्लोकैः कविना उपवर्णितः। उक्तिरियं विमृश्य स्ववाक्यैः लघूपन्यासं लिखत ? (Play activities of Srikrishna in Gokula are described by the poet from the activities of child to adult with few slokas. Examine the sentence and write an essay in your own words) (Score - 8)

www.StudyGuideIndia.com

**सूचनाः**

चरणाङ्गुष्टपानं .......... व्रजयोषिद्भि नयनम्............ शकटासुरमर्दनम् ....... नन्दप्रभृदीनाम् उद्वेगः ............. यशोदायाः विस्मयः ............ नन्दगोपस्य ध्यानम्।

**अथवा**

पूतनामोक्षः स्ववाक्ये विवृणुत? (Describe the पूतनामोक्षः in your own words).

**सूचना-**

यशोदायाः गानम्........... तच्छ्रुत्व पूतनाया आगमनं ........ नभसः अवतारणम् ............ कृषणाय स्तन्यपानं ........ पूतनायाः प्रणापहरणम् ........ भुवि तस्याः पतनम् ............ गोपानां धावनम् ......... पूतनाशरीरे क्रीडन्तं कृष्णं दृष्ट्वा गोपानां विस्मयः।

22. "वने पितृत्यो मृगया प्रसङ्गतः कृतापराधो मुनिशापमाप्तवान्।" अनेन सूचिता कथा सङ्ग्रह्य लिखत? (Write briefly the story mentioned in the above sentence) (Score - 4)

**सूचना -**

किन्दमहर्षिः ......... मृगरुपेण क्रीडन् ............ मृगयार्थं गतेन पाण्डुना दृष्टः। शापमाप्तः।

www.StudyGuideIndia.com

# उत्तरसूचिका

## ANSWER KEY

| प्रश्नसंख्या<br>Q.No. | उत्तरसूचिकाः<br>Answer key | अङ्काः<br>Marks |
|---|---|---|
| 1 | उक्तः + अयम् (1), जेतुम् (1) दैत्यकुलप्रकृताः (1)<br>आशयलेखनाय (2) | 5 |
| 2 | मनः अच्युतस्मरणे असमर्थः | 1 |
| 3 | आशयग्रहणम्, समर्थनम्, कार्यकारणबन्धप्रतिपादनम्,<br>उचितशैलिस्वीकारः इत्यादयोऽंशाः परिगणनीयाः।<br>प्रतिविभागं अङ्कद्वयं। आहत्य सूचनानुसारं लिखितं<br>चेत् सम्पूर्णाङ्गाः। | 8 |
| 4 | सूचनामनुसरति चेत् अङ्कद्वयं। समर्थनाय<br>अङ्कद्वयम्। आहत्य | 4 |
| 5 | द्रौपदी | 1 |
| 6 | त्रयोदश | 1 |
| 7 | पूतना | 1 |
| 8 | भूमिम् | 1 |
| 9 | पाण्डवाः | 1 |
| 10 | यदा सुराः दुर्बलाः तदा | 2 |
| 11 | लेखस्य स्वरूपाय अङ्कद्वयम्।<br>विषयमनुसरति चेत् अङ्कद्वयम्।<br>समग्रतया लेखनाय अङ्कद्वयम्। आहत्य | 6 |
| 12 | वदनं मधुसूदनः कराभ्यां इति श्लोकं लिखितं चेत्। | 2 |
| 13 | एकैकस्य समर्थनाय अङ्कद्वयम्. द्वित्रैः वाक्यैः<br>लेखनीयम्। आहत्य - | 8 |

www.StudyGuideIndia.com

| | | |
|---|---|---|
| 14 | आशयानुवादमेवात्र उद्दिष्टम्। पदानुपदम्<br>अनुवादं नावश्यकम्। पूर्णस्याशयस्य कृते<br>पूर्णाङ्कः। आशयांशस्य कृते युक्तियुक्तोऽङ्कः। | 5 |
| 15 | शष्टतमश्लोकचयने अङ्कद्वयम्<br>आशयं विलिख्य समर्थनाय अङ्कद्वयम्। आहत्य | 4 |
| 16 | विना इति लिखितं चेत्। | 1 |
| 17 | सूचनामनुसरति चेत् अङ्कत्रयम्।<br>समर्थनाय अङ्कत्रयम्।<br>उचितशैलीस्वीकारः चेत् अङ्कद्वयम्। आहत्य | 8 |
| 18 | क. बालकाः उद्याने क्रीडन्ति। समानार्थकपदस्वीकारेऽपि<br>अङ्काः देयाः।<br>ख. नद्यः केरलस्य सम्पद् भवन्ति। मनानार्थकपदस्वीकारेऽपि<br>अङ्काः देयाः।<br>ग. दृश्यं श्रव्यं इति काव्यं द्विविधं भवति।<br>समानार्थकपदस्वीकारेऽपि अङ्काः देया। | 3 |
| 19 | क - विवादाय।<br>ख - ज्ञानाय।<br>ग - मदाय।<br>घ - दानाय अहत्य | 4 |
| 20 | त्वं प्रतिवेदिनिविष्टपूर्णकुम्भं विलसत्तोरणं उज्वलत्प्रदीपं<br>भवदीयागमनप्रहर्षणीभिः प्रजाभिः आकुलं गोकुलं व्रज। | 2 |
| 21 | सूचनामनुसरति - अङ्कत्रयम्।<br>क्रमशः आशयं लिखति - अङ्कत्रयम्।<br>उचितशैलीः स्वीकरोति - अङ्कद्वयम्। | 8 |
| 22 | कथायाः संगृह्य लेखनाय | 4 |
| | TOTAL SCORE | 80 |

www.StudyGuideIndia.com

# प्रश्ननिर्धारणम्

( Questionwise Analysis )

| Qn. No | Cluster of COS पा.उ.श्रेणी | Mental Process मानसिक प्रक्रिया | Type of Qns. प्रश्नस्वरूपाणि | Score अङ्काः | Time समयः |
|---|---|---|---|---|---|
| 1 | 2, 3,13 | 1, 2,5,6,12 | S.A | 5 | 10 |
| 2 | 2 | 1,5,9 | 0 | 1 | 2 |
| 3 | 2,4,6,18 | 1,3,5,6,7,8,10,11,12 | Essay | 8 | 15 |
| 4 | 2,4 | 4,6,7,10,13 | S.A | 4 | 10 |
| 5 | 2,16 | 1,4 | 0 | 1 | 2 |
| 6 | 2,16 | 1,4 | 0 | 1 | 2 |
| 7 | 2,16 | 1,4 | 0 | 1 | 2 |
| 8 | 2,16 | 1,4 | 0 | 1 | 2 |
| 9 | 2,16 | 1,4 | 0 | 1 | 2 |
| 10 | 2,10 | 2,12,7 | S.A | 2 | 4 |
| 11 | 9 | 1,6,7,10,12,13 | Essay | 6 | 10 |
| 12 | 2 | 8,11 | S.A | 2 | 4 |
| 13 | 7 | 1,3,4,5,6,7,10 | S.A | 8 | 15 |
| 14 | 11 | 4,7,9,12 | S.A | 5 | 10 |
| 15 | 4,12 | 2,4,5,6 | S.A | 4 | 8 |
| 16 | 14 | 1,12 | 0 | 1 | 2 |
| 17 | 6,8,12,16 | 1,6,7,8,10,12 | Essay | 8 | 12 |
| 18 | 11 | 1,8,10 | S.A | 3 | 5 |
| 19 | 2,4 | 1,3,4,5 | S.A | 4 | 6 |
| 20 | 2,4 | 3,4 | S.A | 2 | 4 |
| 21 | 2,6,8,12 | 1,4,5,6,9,10 | Essay | 8 | 15 |
| 22 | 5,6 | 5,6,9,10 | S.A | 4 | 8 |
| | | | | | 150 |
| | | | प्रश्नवाचनाय | | 15 |
| | | | Total | | 165 |
| | | | आहत्य | | निमेषः |

www.StudyGuideIndia.com